Barcode : 99999990293803
Title - Aindrastutichaturvinshitika
Author - Yashovijaya
Language - sanskrit
Pages - 143
Publication Year - 1949
Barcode EAN.UCC-13

श्रीआत्मानन्द-जैनग्रन्थरत्नमालायां एकोनाशीतितमं (८९) रत्नम् ।

महोपाध्यायश्रीयशोविजयविरचितो

ऐन्द्रस्तुतिचतुर्विंशतिका.

(स्वोपज्ञविवरणयुता)

संपादकः—

मुनिपुण्यविजयः ।

प्रकाशयित्री

छाणियाग्रामवास्तव्य-श्रेष्ठिगरबडदासतनूज-
नगीनदासस्य किञ्चिदूनद्रव्यसाहाय्येन
भावनगरस्था

श्रीजैन-आत्मानन्दसभा ।

वीरसंवत् २४५४. | मूल्यम्- चत्वार आणकाः | विक्रमसंवत् १९८४
क्षात्रसंवत् ३३ | | खाक्राब्दः १८४१

Published by Vallabhadas Tribhuvandas Gandhi, Secretary
Jain Atmanand Sabha, Bhavnagar, Kathiawar.

Printed by Ramchandra Yesu Shedge, at the
Nirnaya Sagar Press, 25-28, Kolbhat Lane, Bombay.

२	,,	शोभनमुनि	,,
३	,,	मेरुविजयगणि	,,
४	,,	यशोविजयोपाध्याय	,,
५	,, (अपूर्ण)	अज्ञात *	,,

२७ थी ३२ काव्य अगर श्लोकप्रमाण यमकालंकारमयी स्तुति-चतुर्विंशतिकाओ नीचे प्रमाणेनी भळे छे.—

"भद्रकीर्त्तेर्भमल्लाद्या शीर्त्तिल्लारागणाध्वना ।
प्रभा ताराधिपस्येव श्वेताम्बरशिरोमणे ॥ ३२ ॥" तिलकमञ्जरी पृ ४

आमनु विशेष चरित्र जाणवानी इच्छावाळाए प्रभावकचरित्र उपदेशरत्नाकर आदि जयो जोवा ।

१ शोभनमुनि महाकवि धनपालना लघुभाइ थाय ।

२ मेरुविजयगणि विजयसेनसूरिना राज्यमां थया छे । तेमना गुरुनु नाम आनन्दविजयगणि हतु ।

३ आ चतुर्विंशतिवानी प्रारंभनी सात स्तुतिओ (२८ काव्य) "दादासाहेबकी पूजा" आदि बुकोमां छपाई छे । पाछळनी मळती नही होय एम लागे छे ।

* आ पांच स्तुतिचतुर्विंशतिका सिवायनी ९६ काव्यप्रमाण आर्यान्वित कल्याणसागरसूरिकृत पण एक मळे छे. परन्तु ते यमकालंकारमयी न होवाथी तेनी अहीं नोंध लीधी नथी ।

४ आ स्तुतिओमा २४ पद्य प्रत्येक तीर्थंकरनी स्तुतिरूप होय छे, अने ए पद्य अनुक्रमे सर्व जिनस्तुति कालस्तुति तथा शासनाधिष्ठातृदेवतानी स्तुतिरूप होय छे, जे दरेक तीर्थंकरनी स्तुतिना पद्य साथे जोडीने बोलवानां होय छे । पेटलीक चतुर्विंशतिकामां २७ करतां वधारे पद्य छे तेनु कारण मात्र एटलु ज छे के—जेमां *कलशारंभ के कलशनामवाळं काव्य अथवा वधारे श्लोक होय छे ।* जेमके २६ करतां वधारे पद्य छे तेमां शाश्वतजिन, सीमंधर आदि विशेष स्तुतिना पद्य पण समावेश छे एम जाणवु ।

७	,,	२९ श्लो०	चारित्ररत्नगणि
८	,,	२९ का०	,,
९	,,	२९ का०	धर्मसागरोपाध्याय
१०	,,	२७ का०	
११	,, (यमकरहित प्राकृत)	२७ आर्या	
१२	शाश्वतजिनयुत विहर-		
	मानजिनचतुर्विंशतिका	२७ का०	मुद्रित

उपर नोंध लीधी ते सिवायनी अन्य स्तुतिचतुर्विंशतिकाओ होवी जोइए, पण अत्यार सुधीमां जे जे दृष्टिपथमां आवी छे तेनी ज नोंध मात्र आ स्थळे करी छे। अहीं आपेल सूचीमांनी लगभग घणी खरी ऋषभादि वीरपर्यन्त जिननी तेम ज यमकालंकारमयी छे।

भणावकामाटे एकीसाथे सात सो स्तोत्र मेढ आप्या हता। अत्यार नवीन स्तोत्रनी रचना कर्या पछी ज भोजन लेवुं एवी तेमने प्रतिज्ञा हती—

"पुरा श्रीजिनप्रभसूरिभिः प्रतिदिननवस्तवनिर्माणपुरःसरनिरवद्याहारग्रहणाभिग्रहवद्भिः प्रत्यक्षपद्मावतीदेवीवचसाऽभ्युदयिन श्रीतपागच्छ विभाव्य भगवता श्रीसोमतिलकसूरीणा स्वशैक्षशिष्यादिपठनविलोकनार्थं यमक-श्लेष चित्र-च्छन्दोविशेषादिनवनवमञ्जुलगुम्फाः सप्तशतीमिताः स्तवा उपदीकृता निजनामाङ्किता. ॥"

सिद्धान्तागमस्तवाद्यचूरिमारब्धे ॥

१ चारित्ररत्नगणि तपा सोमसुन्दरसूरिना शिष्य हता। तेमणे दानप्रदीप चित्रकूटविहारप्रशस्ति आदिनी रचना करी छे। तेओ विक्रमनी पंदरमी-सोळमी सदीमां विद्यमान हता।

२ धर्मसागरोपाध्याय विजयदानसूरिना शिष्य अने प्रसिद्ध आचार्य हीरविजयसूरिना गुरुभाइ हता। तेओश्रीए गच्छान्तरीओने पराजयकरवामाटे अनेक सनंद अने प्रमाणभूत ग्रन्थोनी रचना करी छे। तेमनी कृतिओमां जंबूद्वीपप्रज्ञप्तिटीका कल्पकिरणावली हरिवंशद्वीपद्वात्रिंशिकासटीक पर्युषणादशश्लोक प्रवचनपरीक्षा षोडशकवृत्ति औपदेशिकमोक्षप्रदीपिका तपागच्छीयपट्टावली आदि मुख्य छे।

आथी इतर अल्प प्रमाणमां ज जोवामां आवे छे, जेनी नोंध पण उपर लीधी छे। भिन्न भिन्न आचार्योदिकृत पर्वतिथिमाहात्म्यगर्भित तीर्थमाहात्म्यगर्भित तेम ज तीर्थंकरोनी छुटक स्तुतिओ यमक पाद-पूर्तिरूप तथा सामान्यछन्दरूप घणा ज विस्तीर्ण प्रमाणमां उप-लब्ध थाय छे।

आ सर्व चतुर्विंशतिकाओमांनी अगर छुटक कोइ पण चार पद्यनी स्तुति देववन्दनमां कायोत्सर्ग कर्या पछी अवश्य बोलवानी होय छे। तेमां नीचे प्रमाणेना अर्थाधिकारो–विषयो होय छे अथवा होवा जोइए—

अहिगयजिण पढम थुई, बीआ सव्वाण तइअ नाणस्स।
वेयावच्चगराणं, उवओगत्थं चउत्थ थुई ॥ ५२ ॥
देववन्दनभाष्य ॥

अर्थात्–प्रथम स्तुतिमां विवक्षित कोई एक तीर्थंकरनी स्तुति, बीजीमां सर्व जिनोनी स्तुति, त्रीजीमां जिनप्रवचननी अने चोथीमां वैयावृत्यकर देवताओनुं स्मरण।

उपर जे स्तुतिचतुर्विंशतिकाओनी सूची आपवामां आवी छे ते पैकी शोभनमुनिकृत चतुर्विंशतिकाना अनुकरणरूप आपणी प्रस्तुत चतुर्विंशतिका छे एम तेनी साथे सरखावतां स्पष्ट रीते तरी आवे छे। आ अनुकरण छन्द अलंकार विशेषण भावार्थ आदि अनेक रीते करवामां आव्युं छे, एटलुं ज नहि पण केटलेक स्थळे तो वाक्यनां वाक्यो अने पदनां पदो पण नहि जेवो फेरफार करीने जेमनां तेम उपाध्यायजीए आहरी लीधां छे। जो आपणे बराबर तारवण

काढीए तो लगभग चोथा भाग जेटली स्तुतिओ एवी ज नजरे पडे के जेमां शोभनस्तुतिमां आवतां केटलां एक विशेषणो मात्र शाब्दिक फेरफार करीने लीधेलां छे। जो के छन्द अने अलंकारमाटे कोईने दावो न ज होइ शके छतां शोभनमुनिए जे स्तुतिमाटे जे छन्द अने यमकालंकारनो जे भेद पसंद कर्यो छे तेने ज उपाध्यायजी पसंद करे ए उपरथी एटलुं तो कही शकाय के—तेओश्री समक्ष शोभनमुनिकृत स्तुतिओ ज मुख्यतया आदर्शरूप छे। आ प्रकारनी पसंदगीथी उपाध्यायजीने यमकालंकारमयी स्तुतिना निर्माणमां तेम ज शोभनस्तुतिमां पद—वाक्य—विशेषणोना आहरणमां केवी सुगमता थइ छे ए नीचेनां उदाहरणोपरथी समजी शकाशे—

काव्य	पाद	
८२	१ जलव्यालव्याघ्रज्वलनगजरुबन्धनयुधो	शो०
८४	१ गजव्यालव्याघ्रानलजलसमिद्बन्धनरुजो	ऐ०
४	३ पायाद्वः श्रुतदेवता निद्धती तत्राब्जकान्ती क्रमौ	शो०
४	२-४ सौभाग्याश्रयतां हिता निद्धती पुण्यप्रभाविक्रमौ	ऐ०
७२	१ याऽत्र विचित्रवर्णविनतात्मजपृष्ठमधिष्ठिता	शो०
७२	१-२ चक्रधरा करालपरघातबलिष्ठमधिष्ठिता प्रभा-	ऐ०
	सुरविनतातनुभवपृष्ठमनुदितापदरं गतारवाक्	शो०
१७	१ सुमते सुमते १८-४ विभवाः विभवाः	ऐ०
१७	१ सुमतिं सुमतिं १७-४ विभवं विभवं	शो०
२४	१ गान्धारि वज्रमुसले जयतः समीर	ऐ०
२४	३ गान्धारि वज्रमुसले जगती शिवास्याः	शो०
३७	१ जयति शीतलतीर्थकृतः सदा	ऐ०
३७	१ जयति शीतलतीर्थपतिर्जने	शो०
७१	१ शुद्धंधनुं प्रवितर मल्लिनाथ मे	ऐ०
७१	१'महोदयं प्रंथितमु मल्लिनाथ मे	शो०

काव्य	पाद	
६९	१ वयमुचश्चक्रवर्त्तिलक्ष्मी०	श्लो०
६९	३ विगणितचक्रवर्त्तिवैभवं०	ऐ०
७१	१ भीममहाभवाब्धि०	श्लो०
७१	१ भीमभवोदधे०	ऐ०
८८	१ हस्तालम्बितचूतलुम्बिलतिका यस्यावलोऽम्बिगलव्	श्लो०
८८	३ दयाम्बिसमिताम्रलुम्बिलतिकाविन्ध्राजिहल्लाऽद्रिवन्	ऐ०

अहीं जे वाक्योनी नोंध आपी छे ते उपाध्यायजीए पद-वाक्यादिनु आहरण केवु कर्युं छे ते जाणवा माटे। विशेषगो अने नामोंनुं आहरण तो आखी स्तुतिमा स्थले स्थले जोवामा आवे छे। तेना उदाहरणो आ स्थले न आपता जिज्ञासुओने ते स्तुतिओ मांथे ल-खाववा भलामण छे।

उपर कहेवामा आव्युं के—'प्रस्तुत चतुर्विंशतिका शोभनस्तुतिना अनुकरणरूप छे' ए उपरथी कोइए एम न मानी लेवु के आ चतु-र्विंशतिकामा कशी नवीनता ज नथी। उपाध्यायजीनी एवी कोइ कृति ज नथी के जेमा नवीनता तेम ज गांभीर्य न होय। ते गांभीरताने तेओश्रीए स्वयं टीकामा स्थले स्थले प्रकट करेल छे। अमे ते पंक्तिओने स्थूलाक्षरमा छपावी छे। आ पंक्तिओ शास्त्रीय गभीर विचा-रोथी भरपूर छे।

आ ठेकाणे एक वात कहेवी जोइए के—जेम अन्य प्रतिभासंपन्न विद्वान् कविओनी यमकालंकारमय कृतिओ क्लिष्टार्थत्व दूरान्वयत्व आदि दोषोथी वंचित नथी रही शकी, ते ज प्रमाणे उपाध्यायजीनी प्रस्तुत कृति पण ते दोषोथी वंचित नथी ज रही शकी। जो के

केटलांक पद्यो एवां पण तारवी शकीए तेम छे के—जेमां आवा दोषो न पण होय, तथापि तेटला उपरथी आखी कृतिने निर्दोष तो न ज कही शकाय। नाने मोढे कहेवायली आ वातने विद्वानो क्षमानी दृष्टियी जुए एम इच्छुं छुं।

प्रस्तुत स्तुतिना संपादनसमये तेनी स्वोपज्ञटीकायुक्त मात्र एक ज प्रति पूज्य श्रीमान् सागरानन्दसूरि महाराज पासेथी मळी छे। ते २१ पानानी अने नवीन लखेली छे। आ प्रतिनो उतारो जेना उपरथी करवामां आव्यो छे ते प्रति चोंटी गयेल हती। तेने उखाडतां तेमां जे स्थळे अक्षरो उखडी गया ते स्थान नवीन प्रतिमां खाली छे। लेखके प्रमादथी अनेक स्थळे पाठो छोडी दीधा छे एटलुं ज नहि पण ते लिपिनो अज्ञ होवाथी तेणे पण अशुद्धिओमां मोटो उमेरो कर्यो छे। आ रीते प्रस्तुत चतुर्विंशतिकानी प्रति अत्यंत अशुद्ध होवा छतां तेने शुद्ध करवामाटे तेम ज तूटी गयेला पाठोने उपाध्यायजीना शब्दोमां ज सांधवामाटे यथाशक्य यत्न कर्यो छे। प्रतिमां ज्यां ज्यां अशुद्धिओ हती ते दरेक स्थळे सुधारेला पाठो गोळ कोष्टकमां आप्या नथी, परन्तु लगभग अंदर ज सुधारी दीधा छे। आ प्रमाणे करवामां कोइ स्थळे प्रमादथी स्खलना थवा पामी होय तो ते माटे विद्वानो समक्ष क्षमा याचना छे।

उपरोक्त प्रति सिवाय एक अवचूरिनी प्रति प्रवर्तक श्रीकांतिविजयजी महाराजना शिष्योना ज्ञानभंडारमांथी मळी छे। आ अवचूरि स्वोपज्ञ टीकाने आधारे करेल टांचणरूप होइ स्वोपज्ञ टीकाना ज शब्दोमां होवाथी टीकाना संशोधनमां क्वचित् क्वचित् सहायक थइ छे।

प्रस्तुत चतुर्विंशतिकानी प्रेसकॉपीने वळानिवासी न्याय-व्याकरणतीर्थ पं० श्रीबेचरभाइए तपासी तेमांनी अशुद्धिओमां घटाडो कर्यो छे।

उपरना सज्जनोनी सहायथी आ चतुर्विंशतिकाने ध्यानपूर्वक सुधारवा छतां स्खलना थइ होय अथवा अशुद्धि रही होय तो विद्वानो तेनुं परिमार्जन करे एम इच्छी विरमुं छुं।

पुण्यविजय.

अनुक्रमणिका ।

ग्रन्थनाम.			पत्रम्
ऐन्द्रस्तुतिचतुर्विंशतिका	....	....	१–८६
परमज्योतिःपञ्चविंशतिका	....	....	८७
परमात्मपञ्चविंशतिका	....	....	९०
विजयप्रभसूरेः स्वाध्यायः	....	....	९३
शत्रुञ्जयमण्डनश्रीऋषभदेवस्तवनम्		....	९५

सूचना—

८ पृष्ठे १२ पङ्क्तौ "सुअ [अज्झावणा]" स्थाने "सुअसमाही"

इति शेषम् ॥

स्वोपज्ञविवरणयुता

ऐन्द्रस्तुतिचतुर्विंशतिका ।

॥ अर्हम् ॥

॥ श्रीमद्विजयवल्लभसूरिपादपद्मेभ्यो नमः ॥

श्रीमद्यशोविजयोपाध्यायविरचिता

ऐन्द्रस्तुतिचतुर्विंशतिका ।

स्वोपज्ञविवरणयुता ।

ऐन्द्रवृन्दनतं पूर्ण-ज्ञानं सत्यगिरं जिनम् ।
नत्वा विवरणं कुर्वे, स्तुतीनामर्हतामहम् ॥ १ ॥

ऐन्द्रश्रातनतो यथार्थवचनः प्रध्वस्तदोषो जगत्,
सद्यो गीतमहोदयः शमवतां राज्याऽधिकाराजितः ।
आद्यस्तीर्थकृतां करोत्विह गुणश्रेणीर्दधन्नाभिभूः,
सद्योगीतमहोदयः शमऽचतां राज्याऽधिका राजितः ॥१॥

ऐन्द्रेति ॥ 'इह' जगति 'जगत्' विशिष्टभव्यलोकम् 'अवतात्' उपदेशद्वारा रक्षतां तीर्यते संसारसमुद्रोऽनेनेति तीर्थं-प्रवचनं तदाधारत्वात् चतुर्विधः श्रमणसङ्घः तं कुर्वन्तीति तीर्थंकृतः-अर्हन्तः तेषां मध्ये 'आद्यः' प्रथमः 'नाभिभूः' श्रीनाभिनृपनन्दन ऋषभदेवः 'सद्यः' तत्काळं 'शं' सुखं करोतु इत्यन्वयः । कथम्भूतः ? ऐन्द्रेण-इन्द्रसम्बन्धिना श्रातेन-समूहेन नतः-नमस्कृतः । पुनः किंविशिष्टः ? यथार्थम्-अबाधितं वचनम्-उपदेशो यस्य सः । पुनः किं० ? प्रकर्षेण-

अपुनर्भावलक्षणेन ध्वस्ताः-नाशिताः दोषाः-रागादयो येन सः। पुनः किं० ? 'शमवताम्' उपशमिनां 'राज्या' श्रेण्या गीतो महान् उदयः-ज्ञानातिशयः महानाम्-उत्सवानाम् उदयो वा यस्य, गीते महोदये-कान्तिकरणे वा यस्य सः। पुनः किं० ? राज्याधिकारैः-राज्यकार्यैः अजितः, अजित इति राज्येण मधियामारमरिय(?)तस्या-जित इति वा अनापादितसङ्केशः, राज्ये आधिकाराः-मानसव्यथा-कारिणः शत्रवः तैः अजित इति वा, राज्याधिरेव कारा दुःखहे-तुत्वात् तया *अजित इति वा* । पुनः किं कुर्वन् ? 'अधिकाः' प्रत्यहं प्रवर्द्धमानाः अधिकं कं-सुखं याभ्य इति वा, 'गुणश्रेणीः' [प्रशमादि] गुणपरम्पराः 'दधत्' बिभ्रत्। पुनः किं० ? 'सयोगी' सकलातिशायितया उत्तमो योगी-चरणर्द्धिसम्पन्नः। पुनः किं० ? इतः-प्राप्तो महोदयः-मोक्षो येन अत एव 'राजितः' शोभितः, न चात्र करणापेक्षा तदादिवविवक्षायामनियमात् (?), अधिकेन केन-सुखेन वा-समन्ताद् राजितः-शोभित इत्येकमेव वा विशेषणं व्याख्येयम्। अत्र च भगवतश्चत्वारः पूजाथतिशयाः प्रतिपादिताः, [यथा-"ऐन्द्रश्रातनतः"] इति विशेषणेन सकलसुरासुरनिकायनायकप्रणा-मप्रतिपादनात् पूजातिशयः, "यथार्थवचनः" इत्यनेन विद्वज्जनीनो-पदेशपेशलपरमार्थभावप्रतिपादनाद् वचनातिशयः, "प्रध्वस्तदोषः"

---

१ "ज्ञानम् अतिशयो वा" इत्यवचूर्याम् ॥ २ अत्र "अजित इति, राज्ये अधिक आर -अरिसमूहत्वेन अजित -अनापादितसङ्केश इति वा" इति पाठः स्यात्॥ ३ अन्येऽस्मिन् सर्वत्र पुस्तकान्तर्गत पाठ लेखकप्रमादपतितत्वादस्माभि-रत्र स्थापितः कल्पनयेति ज्ञेयम् ॥ ४ एतादृक् [ ] कोष्ठान्तर्गत. पाठोऽस्मत्समीप-स्थादर्शगतशून्यस्थाने लिखितो ज्ञेय ॥

इत्यनेन च संस्कारबीज(संसारबीज)रागद्वेषोच्छेदप्रतिपादनाद् अपायापगमातिशयः, ["गीतमहोदयः" इत्यने—] न च निखिलयोगिजनवर्णनीय इत्य.....केवलज्ञानमाहात्म्यप्रतिपादनाद् ज्ञानातिशय उपदर्शित इति ॥ १ ॥

उद्भूताप्रतिरोधबोधकलितत्रैलोक्यभावव्रजा-
स्तीर्थे शस्तरसा महोदितभयाऽकान्ताः सदा शापदम् ।
पुष्णन्तु स्मरनिर्जयप्रसृमरौद्धतापमथा-
स्तीर्थेशस्तरसा महोदितभया [:] कान्ताः सदाशापदम्॥२॥

उद्भूतेति ॥ ['तीर्थेशः' तीर्थङ्कराः] 'तीर्थे' सङ्घे सत्यः—निर्वाणकलङ्कितत्वेन सं.....सेवार्थमागोपचितं शुभं दुर्वन्तु, भवति हि उपाये प्रवृत्तानां.....तत्राभिलाषः । तदुक्तम्—भवतु.....प्रवृत्तमुपेयमाधुर्यमधैर्यकरि।" इति। कथम्भूतम्? सदा 'शापदं' शापम्-उपालम्भं यतीति शापदम्, अगर्हणीयमित्यर्थः। तीर्थेशः [किम्भूताः? उद्भूतः—] ज्ञानावरणविलयेन प्रकटीभूतोऽप्रतिरोधः—क्षयोपशमावस्थाविरहादनिरुद्धप्रसरो यो बोधः—केवलज्ञानं तेन [कलितः—] साक्षात्कृतः त्रैलोक्यभावव्रजः—त्रिजगद्वर्त्तिपदार्थसार्थो यैस्ते । पुनः किं० ? शस्तः—सकलरसाभ्यर्हिततया प्रशस्तो रसः—शान्ताख्यो येषां ते, शस्ते—कल्याणे रसो येषां त इति वा। पुनः किं० ? महती—विपुला सती उदिता—उद्भूता महैः—

---

१ "सतां—सत्तमानाम् आशायाः—इच्छायाः पदं—स्थानं 'पुष्णन्तु' इष्टदाने फलवत् दुर्वन्तु ।" इत्यवचूर्यांम् ॥ २ अत्र त्रुटितः पाठः "समीचीना या आशाः—इच्छाः तासां पदं—स्थानं 'पुष्णन्तु'....." इत्यादिर्भवेत् ॥

उत्सवैरुदिता वा या भा—कान्तिः तया 'कान्ताः' मनोहराः । पुनः किं० ? स्मरस्य—कन्दर्पस्य निर्जयेन—विजयेन प्रसृमरा—प्रसरणशीला प्रौढप्रतापस्य प्रथा—ख्यातिः येषां ते । पुनः किं० ? 'तरसा' वेगेन महसा—तेजसा दितं—खण्डितं भयं यैस्ते । पुनः किं० ? 'अकान्ताः नास्ति कान्ता येषां ते, अकस्य—दुःखस्य अन्तो येभ्यस्ते इति वा ॥२॥

जैनेन्द्रं स्मरतातिविस्तरनयं निर्माय मिथ्यादृशां,
सङ्गत्यागमऽभङ्गमानसहितं हृद्यऽप्रभावि श्रुतम् ।
मिथ्यात्वं हरदूर्जितं शुचिकथं पूर्णं पदानां मिथः,
सङ्गत्या गमभङ्गमानसहितं हृद्यप्रभाः ! विश्रुतम् ॥ ३ ॥

जैनेन्द्रमिति ॥ भोः 'हृद्यप्रभाः !' हृद्या—मनोज्ञा प्रभा—कान्तिः येषां ते यूयं 'जैनेन्द्रं' पारमर्षं 'श्रुतं' सिद्धान्तमाचाराङ्गादिकं 'हृदि' हृदये 'स्मरत' स्मृतिविषयं कुरुत । किं कृत्वा ? 'मिथ्यादृशा' मिथ्यादृष्टीनां 'सङ्गत्यागं' सम्बन्धपरित्यागं 'निर्माय' विधाय, मिथ्यादृष्टिसङ्गो हि क्षयोपशमभावं लब्धमपि निहत्य औदयिकभावसाम्राज्यमेव सम्पादयति, अत एव तत्संस्तवः सम्यक्त्वातिचार उक्तः परमर्षिभिरिति तत्परित्यागेनैव श्रुतस्मरणं श्रेयस्करमित्यूह्यम् । श्रुतं किं० ? अतिविस्तराः—बहुप्रपञ्चा नयाः—नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवम्भूतलक्षणा यत्र तत् । पुनः किं० ? अभङ्गम्—अस्खलितं मानसं येषां तेषां हितं—प्रियावहम् । पुनः किं० ? 'ऊर्जितं' सूर्जितं मिथ्यात्वं हरत् । पुनः विश्रुतम् ? शुचयः—पवित्राः कथाश्च—धर्मकथितानि यत्र तत् । पुनः किं० ? पदानां 'मिथः' परस्परं 'सङ्गत्या' प्रसङ्गादिलक्षणया

'पूर्णम्' अन्यूनम्; यद्यपि सङ्गतिकर्म धर्म एव, तथापि पदानां परस्परया सङ्गतिमत्त्वं नानुपपन्नम्। पुनः किं० ? गमाः—सदृशपाठाः भङ्गाश्च—विकल्पविशेषाः मानानि च—प्रत्यक्षादिप्रमाणानि तैः सहितम्। [पुनः किं० ? 'विश्रुतं' प्रथितम्।] मिथ्यात्वं कीदृशम् ? 'अप्रभावि' प्रभावरहितम् ॥ ३ ॥

या जाड्यं हरते स्मृताऽपि भगवत्यऽम्भोरुहे विस्फुर-
त्सौभाग्या श्रयतां हिता निदधती पुण्यप्रभाविक्रमौ ।
वाग्देवी वितनोतु वो जिनमतं प्रोल्लासयन्ती सदा-
ऽसौ भाग्याश्रयतां हितानि दधती पुण्यप्रभावि क्रमौ ॥४॥

॥ इति श्रीऋषभजिनस्तुतिः ॥ १ ॥

येति ॥ असौ वाग्देवी 'वः' युष्माकं 'सदा' नित्यं हितानि वितनोतु। किं कुर्वती ? 'जिनमतम्' आर्हतशासनं 'प्रोल्लासयन्ती' प्रभावयन्ती। पुनः किं कुर्वती ? भाग्यस्य—शुभादृष्टस्य आश्रयतां—स्थानतां 'दधती' बिभ्रती। जिनमतं कीदृशम् ? पुण्यं प्रकर्षेण भावयति तत् पुण्यप्रभावि। वाग्देवी पुनः किं कुर्वती ? 'अम्भोरुहे' कमले 'क्रमौ' चरणौ 'निदधती' स्थापयन्ती। कीदृशौ क्रमौ ? * पुण्यौ—पवित्रौ प्रभाविक्रमौ—कान्तिपराक्रमौ ययोः याभ्यां वा, प्रकृष्टौ भाविक्रमौ ययोस्तौ प्रभाविक्रमौ, ततः * पुण्यौ च तौ प्रभाविक्रमौ चेति वा समासः। असौ का ? या भगवती 'स्मृताऽपि' चिन्तिताऽपि किं पुनर्विशिष्य आराद्धेत्यपिशब्दार्थः, 'जाड्यम्' अज्ञानं हरते, न च 'देवताप्रसादादज्ञानोच्छेदासिद्धिः, तस्य कर्मविशेषविनाशाधीनत्वात्' इति वाच्यम्, देवताप्रसादस्यापि

क्षयोपशमाधायकत्वेन तथात्वाद्, द्रव्यादिकं प्रतीत्य क्षयोपशमसिद्धेः, तदुक्तम्—
उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया।
दव्वाइँ पंच कप्पइ"
इति किमतिविस्तरेण?। किम्भूता? विस्फुरत्-विभ्राजमानं सौभाग्य-सुभगत्व यस्याः सा। पुनः किं०? 'श्रयता' भजतां 'हिता' हितकारिणी ॥ ४ ॥

॥ इति श्रीप्रथमजिनस्तुतिविवरणम् ॥ १ ॥

मुनितातिरपि यं न रुद्धमोहा,
शमजितमारमदं भवन्दिताऽऽपत्।
भज तमिह जयन्तमाऽऽशुमीशं,
शमऽजिलमाऽऽरमऽदम्भवन्! दितापत् ॥ १ ॥

मुनितातिरिति ॥ हे 'अदम्भवन्!' अकपटवन्! त्वं दिता-खण्डिता आपद् येन,- तादृशाऽप्युरस्खलेनाऽप्युक्त लङ्क्षितमित्यर्थः(?),- 'श' सुखम् 'आशुं' लब्धुम् 'आरम्' अन्तरङ्गारिसमूहं 'जयन्तम्' अभिभवन्तम् 'इह' जगति वम् अजित भज। तं कम्? यं 'मुनितातिरपि' योगिपङ्क्तिरपि 'न आपत्' न साक्षात्चक्रे, तथा चावशितशान्तादगोचरत्वस्य (?) वार्तोऽपि दूर इति भावः। कीदृशी मुनितातिः? रुद्धः-वशीकृतो मोहो यया सा। पुनः कीदृशी? भेन-नक्षत्रादयेन ज्योतिष्कदेवभेदेन वन्दिता-स्तुता अभिवादिता वा। यं कीदृशम्? शमेन जितौ मारमदौ-कन्दर्प-

द्धारौ येन तम्; यद्यपि शमस्य क्रोधोपशामकत्वमेव, मारमदयोस्तु ब्रह्मचर्यमार्दवाभ्यामेव जयोपपत्तिः, तथापि शमसम्पत्तौ ब्रह्मचर्यमार्दवसम्पत्तिरपि प्रायो नियतैवेत्येवमुक्तिः । पुनः किं० ? 'हरं' सामर्थ्यवन्तं.....अपि दुराराधत्वमुक्तं वत् कथमतिकृच्छ्रसाध्ये भगवद्भजनेऽस्ता(सा)दृशां प्रवृत्तिरिति चेत्, न, अतिकृच्छ्रसाध्येऽप्यर्थे ऽ.....निधिलाभाशाशातेन प्रवृत्त्यप्रतिबन्धादिति विभावनीयम् ॥ १ ॥

नियतमुपगता भवे लभन्ते,
परमतमोहर ! यं भयाऽनिदानम् ।
हर रुचिर ! ददद् जिनौघ ! तं द्राक्,
परमतमोहरयं भयानि दानम् ॥ २ ॥

नियतमिति ॥ हे 'परमतमोहर !' अनन्तभवभ्रमितकर्मनाशक !, परमतमान्–उत्कृष्टतमान् ऊहान्–शुभोदर्कतर्कान् राति–ददाति तत्सम्बोधनं हे परमतमोहर ! इति वा; हे 'रुचिर !' मनोज्ञ !, कया ? 'भया' कान्त्या; हे 'जिनौघ !' भगवत्कदम्बक ! त्वं 'द्राक्' शीघ्रं *तम्* परेषां–शाक्यादीनां मते–दर्शने मोहः–यो दृष्टिरागः तस्य[1] रयं–वेगं हर । त्वं किं कुर्वन् ? 'अनिदानं' निदानरहितं 'दानम्' अभयदानादिकं ददत् । तं कम् ? 'यम्' 'उपगताः' आश्रिताः प्राणिनः 'भवे' संसारे 'नियतं' निश्चितं 'भयानि'

"इहपरलोगादाणमकम्हाआजीवमरणमसिलोआ ।
सत्त भयट्ठाणाइं, जिणेहिं भइंतभणिआइं ॥"

---

१ परदर्शनमोहवेगमित्यर्थः ।

इति तथाप्रसिद्धान् आतङ्कान् 'लभन्ते' प्राप्नुवन्ति ॥ २ ॥

नयगहनमऽतिस्फुटानुयोगं,
जिनमतमुद्यतमानसा ! धुतारम् ।
जननभयजिहासया निरस्ता-
ऽऽजि नमत मुद्यतमानसाधुतारम् ॥ ३ ॥

नयगहनमिति ॥ भोः 'उद्यतमानसाः !' निरन्तरम् उद्यतं-चरणकरणोपादानप्रणिधानप्रवणं मानसम्—अन्तःकरणं येषा ते तथा यूयं 'जननभयजि[हासया' ससारभयप्रहाणेच्छया 'जिनमत' जिनागमं] 'नमत' नमस्कुरुत, इत्थमेव विध्यर्थाराधनं कृतं भवति,.....परमार्थतो भवत्यागार्थनिर्जरार्थमेव श्रुताध्ययनोपदेशात् । तथा चाऽऽगमः—"चउविहा खलु सुअ [अज्झावणा] पण्णत्ता, तं जहा—सुअं मे भविस्सइ त्ति अज्झाइयव्वं भवति १, एगग्गचित्तो भविस्सामि त्ति अज्झाइ-यव्वं भवति २, अप्पाणं ठावइस्सामि त्ति अज्झाइयव्वं भवति ३, ठिओ परं ठावइस्सामि त्ति अज्झाइयव्वं भवति ४ ।" इति । कीदृशम् ? नयैः—नैगमादिभिः गहन—गम्भीरम् । पुनः कि० ? सूत्रार्थनिर्युक्त्यर्थनिरवशेषार्थप्रतिपादनक्रमाद् अतिस्फुटाः—अतिस्फुटा अनुयोगा यस्य तत् । पुनः कि० ? धुतः—कम्पित आरः—अरिसमूहो येन तत् । पुनः कि० ? निरस्तः—निराकृत आजिः—सग्रामो येन यत्र वा तत् । पुनः कि० ? मुदा—शमसुखसाम्राज्यल-क्षणहर्षेण यतमानाः—ध्यानादौ प्रवर्त्तमाना ये साधवः—श्रमणाः तान् वारयति—भीमभवजलधिपार प्रापयतीति तत् । न चात्र 'प्रवृत्त्युत्सर्ं

शमसम्पत्तिः, तत्सम्पत्तौ च प्रवृत्तिः' इत्यन्योन्याश्रयः शङ्कनीयः, विशिष्टशमवतः प्रवृत्युत्तरं विशिष्टशमसम्पत्त्या दोषाभावात् । अत एवोक्तम्—

"न साम्येन विना ध्यानं, न ध्यानेन विना च तत् ।
निष्कम्पं जायते तस्माद्, द्वयमन्योन्यकारणात् ॥"

इति ॥ ३ ॥

पविमपि दधतीह मानसीन्द्रै-
र्महितमऽदम्भवतां महाधिकारम् ।
दलयतु निवहे सुराङ्गनाना-
मऽहितमदं भवतां महाधिकाऽरम् ॥ ४ ॥

॥ इति श्रीअजितजिनस्तुतिः ॥ २ ॥

पविमपीति ॥ 'इह' जगति 'मानसी' 'भवतां' युष्माकम् 'अहितमदं' शत्रुसमयं 'दलयतु' निराकरोतु । किं कुर्वती ? 'इन्द्रैः' शक्रैः 'महितं' पूजितं 'पविं' वज्रम् 'अपि' पुनः 'सुराङ्गनानां' देवाङ्गनानां 'निवहे' समूहे 'महाधिकारं' प्रौढाधिपत्यं 'दधती' बिभ्रती । महाधिं कारयतीति 'महाधिकारम्' इति अहितमदविशेषण-स्वपक्षे 'पविं' वज्रं शत्रुहननसावधानतया 'अपिदधती' अनाच्छादयन्ती इति व्याख्येयम् । भवतां कथम्भूतानाम् ? 'अदम्भवताम्' अकपटवताम् । मानसी कीदृशी ? 'अरम्' अत्यर्थं महैः-उत्सवैः अधिका ॥ ४ ॥

॥ इति श्रीअजितजिनस्तुतिविवरणम् ॥ २ ॥

---

१ एतदभिधाना शासनाधिष्ठात्री देवता ।

शम्भव ! सुखं ददत् त्वं,
　　भाविनि भावारवारवारण ! विश्वम् ।
वासवसमूहमहिता-
　　ऽभाविनिभाऽवाऽरवारवाऽरण ! विश्वम् ॥ १ ॥

शम्भवेति ॥ अभावि-अभविष्यत् निभं-कपटं यस्य,-वीतच्छद्मतया कर्मबन्धहेत्वभावात्,-तस्य सम्बोधनं हे अभाविनिभ !, भावारः-सम्यक्त्वच्छेदिमिथ्यात्वरूपभावचक्रस्यावयवविशेषः,-शब्दनयोपग्रहादाभिग्रहिकत्वादिर्गृह्यते,-तस्य वारः-समूहस्तं वारयति-निराकरोति यस्तस्यामन्त्रणं हे भावारवारवारण !, हे 'वासवसमूहमहित !' इन्द्रव्रजार्चित !, हे 'अरवारव !' अरवाणां-शब्दरहितानाम् अर्थात् मूकानाम् आरवः-शब्दो यस्माद्धेतुभूतात् "मूको जल्पति" इत्यादि स्तुतेः तस्य सम्बोधनम्, हे 'अरण !' असंग्राम ! *हे शम्भव !* त्वं 'विश्वं' सकलं 'विश्वं' जगत् 'अव' रक्ष । त्वं किं कुर्वन् ? 'भाविनि' शुभप्रणिधाने पुंसि 'सुखं' सातं 'ददत्' यच्छन् ॥ १ ॥

यद्धर्मः शं भविनां,
　　सन्ततमुदितोदितोऽदितोदारकरः ।
स जयतु सार्वगणः शुचि-
　　सन्ततमुदितोऽदितोदितोऽदारकरः ॥ २ ॥

यद्धर्म इति ॥ सः 'सार्वगणः' तीर्थकरसमूहो जयतु । किम्भूतः ? शुचिः-निर्मला सन्तता-अच्छिन्नधारा मुदिता-परमतुष्टिर्यस्य सः, शुचिना-भागेन सन्तता-अविरलप्रवाहापन्निता

मुद्–आनन्दः ताम् इतः–प्राप्त इति वा । पुनः किं० ? अदितम्–अखण्डितं प्रमाणैरनाबाधितत्वात् उदितं–वचनं यस्य सः । पुनः किं० ? नदाराः–स्त्रियः करः–दण्डश्च यस्य सः; कं–सुखं रातीति वा करः, अदारश्चासौ कर इति वा । पुनः किं० ? उदारः–वार्षिकदाने श्रवणत्वात् निखिलयाचकप्रार्थितपूरणप्रत्यलः करः–हस्तो यस्य सः, उदाराः कराः–किरणा यस्य स इति वा । स कः ? 'यद्धर्मः' यदुपज्ञः श्रुतधर्मः 'भविनां' संसारिणां 'शं' सुखम् 'अदित'* ददौ *, लभन्ते हि सुखमवश्यं श्रुताद् विदिततत्त्वाः प्राणिनः, ततः शुभमात्रे प्रवृत्तिभावात्, अत एवोक्तम्—

"पावाओ विणिवित्ती, पवत्तणा तह य कुसलपक्खम्मि ।
विणयस्स य पडिवत्ती, तिण्णि वि नाणे समप्पन्ति ॥"

इति । कीदृशो यद्धर्मः ? 'सन्ततं' निरन्तरं सदमन्तरास्तमाऽभावेन (?)'उदितोदितः' उत्पत्तिकालादारभ्य यावदवस्थानं लब्धोदय इति भावः ॥ २ ॥

जैनी गीः सा जयता–
ज्ञ यया शमितामिता मिताक्षररुच्या ।
किं सन्तः समवतर–
ज्ञयया शमितामितामिताक्षररुच्या ॥ ३ ॥

जैनी गीरिति ॥ सा 'जैनी' आर्हती 'गीः' वाणी जयतात् । कीदृशी ? मितैः–स्वल्पैः अक्षरैः–वर्णैः रुच्या–मनोहरा, बह्वर्थमल्पाक्षरमेव हि सूत्रमामनन्ति, अत एवोक्तम्—

"सव्वण्णुणं जइ हुज्ज वालुया सवउदहिजं तोयं ।

इत्तो अणंतगुणिओ, अत्थो इक्कस्स सुत्तस्स ॥"

इति, तदेवमत्रार्थापेक्षमक्षराणां मितत्वम्, अन्यथा तु बहुहस्तिप्रमाणमपीपुञ्जलेख्यत्वाभिधानान्न तदुपपत्तिः; अथवा त्रिपदीरूपैव जैनी गीर्ग्राह्या, तस्याश्चोभयथाऽपि मितास्करत्वमेव । सा का ? 'यया' हेतुभूतया 'सन्तः' संविग्नगीतार्थाः शमिता—क्षपिताऽमितामिता—अपरिमितरोगिता यत्र,— वेदनीयकर्मविटपिनः समूलमुन्मूलनाद्,— एतादृशं यद् अक्षर—मोक्षस्तस्य रुचिः—अभिलाषस्तया किं 'शमिताम्' उपशमसम्पन्नतां 'न इता' न प्राप्ताः ? अपि तु प्राप्ता एवेत्यर्थः । कीदृश्या यया ? समवतरन्तः—अनुयोगापृथक्त्वदशायां प्रतिप्रतीकं समापतन्तो नयाः—नैगमादयो यस्याः सा, तदुक्तम्—

"अपुहत्ते समुआरो" इति ।

समवतरन्तः—समुद्भवन्तो नयाः—नीतयो यस्याः तयेति वा ॥३॥

दलयतु काञ्चनकान्ति-
जनतामहिता हिता हि ताराऽऽगमदा ।
इह वज्रशृङ्खला दु-
र्जनतामऽहिताहिताहितारागमदा ॥ ४ ॥

॥ इति श्रीशम्भवजिनस्तुतिः ॥ ३ ॥

दलयत्विति ॥ 'इह' जगति वज्रशृङ्खला 'हि' निश्चितं 'दुर्जनतां' खलभावं दलयतु । कीदृशी ? काञ्चनवत्—सुवर्णवत् कान्तिः—द्युतिर्यस्याः सा । पुनः किं० ? जनतया—जनसमूहेन महिता—पूजिता । पुनः किं० ? 'हिता' हितकारिणी । पुनः किं० ? तारम्—उच्चलम्

आगमं ददाति वरदानेन सा, 'तारा' उज्ज्वला 'आगमदा' श्रुतदायिनी इति च पदद्वयं वा व्याख्येयम्, तारायाः—सुगतदेवतायाः आगमं याति—खण्डयतीति वा, तारागे—सुरशाखिनि स्वक्रीडापर्वते वा मदः—सयो यस्याः सेति वा, तां—लक्ष्मीं राति—ददातीति तादृशो य आगमः—सज्जनसमागमस्तं ददाति सेति वा। पुनः किं० ? अहितेषु—वैरिषु आहितौ—स्थापितौ अहितारागमदौ—अप्रियस्नेहाहङ्काराभावौ यया सा ॥ ४ ॥

॥ इति श्रीशम्भवजिनस्तुतिविवरणम् ॥ ३ ॥

त्वमभिनन्दन ! दिव्यगिरा निरा-
कृतसभाजनसाध्वस ! हारिभिः ।
अहतधैर्य ! गुणैर्जय राजितः,
कृतसभाजन ! साध्वसहारिभिः ॥ १ ॥

त्वमिति ॥ हे 'निराकृतसभाजनसाध्वस !' निराकृतं सभाजनानां—पार्षदलोकानां साध्वसम्—इहलोकादिभयं येन स तत्सम्बुद्धौ, कया ? 'दिव्यगिरा' सर्वभाषानुगामिन्या योजनगामिन्या सकलातिशयसम्पन्नया भाषया, सापेक्षत्वेऽपि गमकत्वात् समासः; हे 'अहतधैर्य !' * अहतम्—अविनष्टं धैर्यं—धीरता यस्य स तत्सम्बुद्धौ, * कैः ? साधून्—उत्तमान् न सहन्तीति साध्वसहाः ते च तेऽरयः—शत्रवस्तैः; हे !कृतं—विहितं "सभाज प्रीतिदर्शनयोः" इति

---

१ यद्यपि "षह मर्षणे" धातोरात्मनेपदत्वं प्रसिद्धम् तथापि क्वचिदात्मनेपदस्यानित्यत्वमपि वैयाकरणैरिष्टमित्यदोषोऽत्र ।

घातोः सभाजनं-संतोषो येन तस्यामन्त्रणम्, हे अभिनन्दन ! त्वं जय । किंलक्षणः ? 'राजितः' शोभितः, कैः ? गुणैः, कीदृशैः ? 'हारिभिः' मनोहरैः ॥ १ ॥

भगवतां जननस्य जयन्निहा-
ऽऽशु भवतां तनुतां परमुत्करः ।
त्रिजगतीदुरितोपशमे पटुः,
शुभवतां तनुतां परमुत्करः ॥ २ ॥

भगवतामिति ॥ 'इह' जगति 'भगवतां' तीर्थकृतां 'उत्करः' समूहः 'शुभवतां' कल्याणिनां 'भवतां' युष्माकम् 'आशु' शीघ्रं 'जननस्य' संसारस्य 'तनुतां' कृशतां 'तनुतां' कुरुताम् । किं कुर्वन् ? 'परं' शत्रुं 'जयन्' अभिभवन् । किंलक्षणः ? त्रिजगती-दुरितस्य-त्रिभुवनपातकस्य उपशमे 'पटुः' समर्थः । पुनः किं० ? परां-प्रकृष्टां सकलसांसारिकसुखातिशायित्वात् मुदं-मोक्षसुखं करोति यः स तथा । न त्वत्र 'संसारस्य कालस्थितिरूपस्य तदभावः कर्तुं न शक्यते' इति शङ्कनीयम्, कर्मस्थितिना-शेन तत्तनूभावसम्भवात्, सूत्रप्रामाण्यात्, अन्यथा तदनु-पपत्तेः; न च भगवतो.....संसारस्य यथावस्थितत्वात् नाशानुपपत्तिः' इत्यपि कुधीद्यं नाशङ्क-नीयम्, भगवता मिथ्यासभोग्यस्य हास्ययोग्यतां यथा....
.....ऽन्यत्र विस्तरः ॥ २ ॥

त्रिदिवमिच्छति यश्चतुरः स्फुर-
दसुरसम्मदमङ्यं मतमर्हताम् ।

स्मरतु चारु ददत् पदमुच्चकैः,
सुरसमूहमयं मतमर्हताम् ॥ ३ ॥

त्रिदिवमिति ॥ 'अयं' जनः 'अर्हतां' भगवतां 'मतम्' आगमं 'स्मरतु' ध्यायतु, कथम् ? उच्चकैः । कीदृशम् ? सुष्ठु-[शोभनो] रसः-शान्ताख्यो यत्र यस्माद् वा तत्। पुनः किं० ? 'ऊहमयं' प्रकृष्टविचारम् । पुनः किं० ? 'चारु' मनोहरम् । किं कुर्वत् ? 'अर्हतां' पूजयतां 'मतम्' इष्टं 'पदं' मोक्षलक्षणं ददत्, प्रवचनपूजाया मोक्षहेतुत्वात्, 'अर्हतां' योग्यतां ददत् 'मतम्' अभीष्टं 'पदं' स्थानम् इति व्यस्तं वा व्याख्येयम् । अयं कः ? यः 'चतुरः' विदुरः 'त्रिदिवं' [स्वर्गम् 'इच्छति'] समीहते। कीदृशं त्रिदिवम् ? स्फुरन्-दीप्यमानः सुरसमूहः-देवगणो यत्र तत् ॥ ३ ॥

धृतसकाण्डधनुर्यतु तेजसा,
न रहिता सदया रुचिराजिता ।
मदहितानि परैरिह रोहिणी,
नरहिता सदया रुचिराऽजिता ॥ ४ ॥

॥ इति श्रीअभिनन्दनजिनस्तुतिः ॥ ४ ॥

धृतेति ॥ 'इह' जगति रोहिणी 'मदहितानि' ममाऽप्रियाणि 'यतु' खण्डयतु । कीदृशी ? धृतं सकाण्डं-सबाणं धनुर्यया सा । पुनः किं० ? 'तेजसा' प्रतापेन 'न रहिता' [न वियुक्ता] । पुनः किं० ? सत्-शोभ[नम् अयम्-इष्टदैवं]यस्याः सा । पुनः किं० ? रुच्या-कान्त्या राजिता-शोभिता । पुनः किं० ? 'परैः' शत्रुभिः अजिता-अनभिभूता। पुनः किं० ? नराणां-म[नुष्याणां हिता-

हितकारि]णी । पुनः किं० ? 'सदया' सकरुणा, प्रभाविक..... ..... । पुनः किं० ? ['रुचिरा'] रुचि-सत्सङ्गतिं राति-ददा-तीति भावः ॥ ४ ॥

॥ इति श्रीअभिनन्दनजिनस्तुतिविवरणम् ॥ ४ ॥

नम नमदमरसदमरस-
सुमतिं सुमतिं सदसदरमुदारमुदा ।
जनिताजनितापदपद-
विभवं विभवं नर ! नरकान्तं कान्तम् ॥ १ ॥

नम नमेति ॥ हे नर ! त्वं सुमतिम् 'उदारमुदा' प्रकृष्टहर्षेण 'न[म'नमस्कु]रु । कीदृशम् ? नमन्तः अमराः-देवाः यस्य च्य-वन.....भवन वर्त्तते यः स सदमरसः, सुष्ठु-शोभना म[तिर्यस्य सः] सुमतिः, ततो भोग भगवन् म.....तः । पुनः किं० ? सङ्गतया सदरोऽणस्य यश्चया..... ..... [अजनिता]पदस्य-संसारतापाप्रदस्य..... .....[भवः-] संसारो येन । पुनः किं० ? 'विभवं' संसार[रहितं.....॥ १ ॥

अवचूरिः-'नम' प्रणम, नमदमरः-नमत्सुरः, सदमरसः-'दमरसेन सहितश्चासौ सुमतिः-शोभनमतिश्च तम्, सत्सु गण्येऽ-सदरः-निर्भयः, सँश्चासावसदरश्चेति वा तम्, हे उदार ! 'मुदा' हर्षेण जनितः-कृतः अजनितापदस्य-अभवतापदायकस्य पदस्य

---

१ टीकायाः खण्डितत्वादवचूर्या उपन्यासः ।

विभवो येन तम्, 'विभवं' संसाररहितम्, हे नर !, नरकस्य अन्तो यस्मात् तम्, 'कान्तं' मनोज्ञम् ॥ १ ॥

भवभवभयदाऽभयदा-
वली वलीयोदयोदयाऽमायामा ।
दद्यादऽद्याऽमितमित-
शमा शमादिष्टदिष्टबीजाऽबीजा ॥ २ ॥

भवभवेति ॥ 'अभयदावली' तीर्थंकरश्रेणिः अद्य 'अमितम्' अपरिमितं 'शं' सुखं .... माया—कपटम् आमः—रोगश्च यस्याः सा । पुनः किं० ? इतः—प्राप्तः पुनः समापरिता येन यस्य । पुनः किं० ?..... सं दिष्टबीजम्—अदृष्टहेतुकं मयोरम्भ । पुनः किं० ? बीज .....यया ॥ २ ॥

अवचूरिः—भवभवं—संसारोद्भवं भयं यतीति भवभवभयदा, 'अभयदावली' जिनश्रेणिः, वलीयान् दयोदयः—करुणोदयो यस्याः सा, 'अमायामा' अमायारोगा, दद्यात्, अद्य 'अमितम्' अमानम्, 'इतशमा' प्राप्तशमा, 'शम्' सुखम्, आदिष्टम्—आज्ञप्तं दिष्टबीजं—धर्माधर्महेतुर्यया, 'अबीजा' निर्जन्मा ॥ २ ॥

दमदमऽसुगमं सुगमं,
सदा सदानन्दनं दयाविद्याविद् ।
परमऽपरमऽस्मर ! स्मर,
महामहा धीरधी रसमयं समयम् ॥ ३ ॥

दमदमिति ॥ हे 'असर !' कन्दर्परहित ! त्वं 'सदा' नितं 'समयं' सिद्धान्तं 'सर' स्मृतिवि[षयं कुरु, अनेन कामादिवि]-प्लुतचित्तस्यानधिकारित्वं सूचितम्। कीदृशम् ? दमम्-इन्द्रियजयं ददाति यस्तम्। पुनः कि० ? 'असुगमं' दुष्प्रत्यूहम्, उपरतदुर्नेष्टं तु पुष्टिं (?)। * पुनः कि० ? 'सुगमं' * सुष्ठु-शोभना गमाः-सदृश-पाठाः यत्र तम्। पुनः कि० ? सताम्-उत्तमानाम् आनन्दनं-हर्ष-कारि। पुनः कि० ? 'परं' प्रकृष्टम्। * पुनः कि० ? 'अपरम्' नास्ति परम्-उत्कृष्टं यस्मात् तम्। त्व किम्भूतः ? * 'दयाविद्याविद्' दया-प्रतिपादकं शास्त्रं वेत्ति-जानाति यः, अहिंसाविधिज्ञानस्यैव समयज्ञा-नोत्कर्षदर्शनाद् अत्याव[श्यक]मिदं विशेषणम्। पुनः किम्भूतस्त्वम् ? 'महामहाः' महातेजाः। पुनः कि० ? धीरा-दृढसम्यक्त्वोपबृंहित-त्वेनाऽक्षोभ्या धीः-बुद्धिर्यस्य सः। * पुनः कि० ? 'रसमयं' प्रकृष्ट-रसम्। * धीराणां धनस्तेषु स्थिरस्तेन तेऽपि समयस्यैकविशेषणम्· (धीराणां धीरसः-बुद्धिरसो येन तमिति समयस्यैव वा विशेषणम्।) अस्मिन् पक्षे 'अयम्' इति विशेषणस्य कार्ये कारणोपचाराद् इष्ट-भाग्यजनकमित्यर्थः ॥ ३ ॥

काली कालीरऽसरस-
भावाभावाय नयनमुखदाऽसुखदा ।
महिमहितनुता वनुता-
दितादितामानमानरुच्या रुच्या ॥ ४ ॥
॥ इति श्रीसुमतिजिनस्तुतिः ॥ ५ ॥

कालीति ॥ कालीनाम्नी देवी 'असरसभावाभावाय' विरसभावापनयनाय 'कालीः' सुखालीः 'तनुतात्' कुरुतात्, न च 'एवं वैरस्यापनयनकामनया सुखस्य काम्यत्वात् तस्य निरुपाधिककामनाविषयत्वभङ्गः' इति शङ्कनीयम्, सुखहेतुविषयोपनिपातस्यैवात्र काम्यत्वात्, मुख्यसुखस्य तथात्वाविरोधात् । काली कीदृशी ? नयनयोः—लोचनयोः सुखदा—सातदायिनी । पुनः किं० ? असुख—दुःखं द्यति—खण्डयति या सा । पुनः किं० ? महिमिः—उत्सविभिर्महिता—पूजिता चासौ नुता-स्तुता च महिभिर्महिताः तैः नुतेति वा, महिमहिताभ्यां—महत्त्वप्रथाभ्यां तद्गुणपुरुषाकार[1] (?) नुता, प्राणिभिरिति गम्यत इति वा । पुनः किं० ? इतः—प्राप्तोऽदितः—अखण्डितः अमानः—अपरिमितो यो मानः—अहङ्कारः पूजा वा तत्र या रुचिः—अभिलाषः तया कृत्व 'रुच्या' मनोज्ञा, अथवा इता—प्राप्ता अदिता—अखण्डिता अमाना—अपरिमिता या मा—लक्ष्मीर्यया सा, पुनः किं० ? 'रुच्या' कान्त्या 'न अरुच्या' नाऽमनोज्ञेति व्याख्येयम् ॥ ४ ॥

॥ इति श्रीसुमतिजिनस्तुतिविवरणम् ॥ ५ ॥

पद्मप्रभेश ! तव यस्य रुचिर्मते स—
द्विश्वासमानसदयापर ! भावि तस्य ।
नोच्चैःपदं किमु पचेलिमपुण्यसम्पद्,
विश्वासमान ! सदयाऽपर ! भावितस्य ॥ १ ॥

---

१ "असरसभावस्य—दौर्जन्यस्य अभावाय—अपनयनाय" इत्यवचूरिः ॥

पद्मप्रभेशेति ॥ हे 'सद्वि०पर!' सन्–शोभनः श्रद्धयाऽनभिभवनीयो विश्वासः–जिनवचनप्रामाण्यप्रतिपत्तिस्थिरसो यत्र एतादृशमानसम्–अन्तःकरणं येषां तेषु दयापरः, यद्यपि भगवतः सर्वेष्वपि जीवेषु अविशेषेण कृपालुत्वात् कृपाऽस्त्येव, अन्यथा माध्यस्थ्यहानिप्रसङ्गात्, तथापि येषु तत्पततं सोच्चालक्षणमभ्युदयादिस्व(?) तत्रैव परमार्थतः सा न त्वन्यत्रापीति निश्चयाश्रयणादित्थमुक्तम्, तस्यामन्त्रणम्, हे 'विश्वा०' विश्वे–जगति असमानः–निरुपमानः तस्यामन्त्रणम्, हे 'सदय!' सत्–शोभनम् अयम्–इष्टदैवं यस्य तस्यामन्त्रणम्, हे 'अपर!' नास्ति परः–शत्रुर्यस्य नास्ति परः–उत्कृष्टो वा यस्मात् तस्यामन्त्रणम्, हे 'पद्मप्रभेश!' पद्मप्रभस्वामिन्! 'यस्य' पुंस. तव 'मते' शासने 'रुचिः' श्रद्धा अस्तीति शेषः, तस्य 'उच्चैःपदं' सुदेवत्वमोक्षादिलक्षणमुत्कृष्टपदं किमु 'न भावि' न भविष्यति ? अपि तु भाव्येवेत्यर्थः। कीदृशस्य तस्य ? 'भावितस्य' वासितस्य। पदं किम्भूतम् ? पवेलिमा–परिपक्का पुण्यसम्पत्–शुभप्रकृतिसमृद्धिः पुण्या–पवित्रा वा सम्पत्–शाश्वतानन्दरूपा यत्र तत् ॥ १ ॥

मूर्त्तिः शमस्य दधती किमु या पट्टनि,
पुण्यानि काचन सभासु रराज नव्या।
सा स्तूयतां भगवतां वितितिः स्वभक्त्या,
पुण्याऽनिकाचन! सभा सुरराजनव्या ॥ २ ॥

---

१ अत्र "तत्फलं मोक्षलक्षणमभ्युदयेत् तत्रैव" इतिरूप पाठो भवेत् ॥

मूर्त्तिरिति ॥ हे 'अनिकाचन !' निकाचनं नाम सफलकर-ण(णा)योग्यत्वेन कर्मबन्धव्यवस्थापनम्, तच्चात्र मिथ्यात्वविषयं गृह्यते, ततो नास्ति निकाचनमस्येत्यनिकाचनः तस्यामन्त्रणम्, एतेन निकाचितमिथ्यात्वमोहाः पुमांसोऽनामन्त्रणीया एव, तेषां भगवद्भजनानधिकारित्वात्; अचिन्त्यचिन्तामणिलाभ-कल्पं खल्वेतत्, नाऽतो मन्दभागधेयानां तेषामेतल्लाभ इति व्यज्यते । त्वया सा 'भगवतां' तीर्थकृतां 'विततिः' श्रेणिः स्तूय-ताम्, कया ? 'स्वभक्त्या' आत्मीयश्रद्धया, परानुवृत्त्या तु तस्या द्रव्यस्तुतिमात्रत्वेनाल्पफलत्वात् । कीदृशी ? 'पुण्या' पवित्रा । पुनः किं० ? 'सभा' सह भया—लक्ष्मणया प्रशस्तकान्त्या वर्तत इति सभा, नाऽत्तोऽपुष्टार्थकत्वम् । पुनः किं० ? सुरराजैः—देवेन्द्रैः नव्या-स्तव्या, सह भैः—नक्षत्रैर्वर्तन्ते ये ते सभाः ते च तेऽसुरराजाः—असुरेन्द्राश्च तैः नव्या—स्तव्या इत्येकमेव वा विशेषणम् । सा का ? या 'पट्टनि' प्रौढानि 'पुण्यानि' शुभकर्माणि 'दधती' विपाकानुभ-वेन पुष्णती 'सभासु' पर्षत्सु 'रराज' शुशुभे 'किमु' उत्प्रेक्षे—'शमस्य' शान्तरसस्य 'नव्या' नवीना 'काचन' अनिर्वचनीया 'मूर्त्तिः' तनुः ॥ २ ॥

लिप्सुः पदं परिगतैर्विनयेन जैनीं,
वाचं यमैः सततमश्नुत रोचितार्थाम् ।
स्याद्वादमुद्रितकुतीर्थनयावतारां,
वाचंयमैः सततमं चतुरोचितार्थाम् ॥ ३ ॥

---

१ "भगवतां विततिः कीदृशी ?" इति ज्ञेयम् ॥

लिप्सुरिति ॥ सह ततया—विस्तीर्णया मया—लक्ष्म्या वर्तते यत् तत् सततमम्, सह तया—लक्ष्म्या वर्तते यत् तत् सतम् अतिशयितं सतं सततमिति वा, 'पदं' सुदेवत्वलक्षणं 'लिप्सुः' लब्धुमिच्छुः पुरुषः 'जैनीम्' आर्हतीं 'वाचं' सरस्वतीं 'सततं' निरन्तरम् 'अर्चतु' पूजयतु; केन ? विनयेन, अविनयेन पूजनं तु परमार्थतोऽपूजनमेवेति भावः । जैनीं वाचं किम्भूताम् ? रोचितः—अद्धितोऽर्थः—प्रतिपाद्यविषयो यस्याः सा ताम्, कैः ? 'वाचंयमैः' श्रमणैः, किम्भूतैः ? 'यमैः' अहिंसासत्यास्तेयब्रह्माकिञ्चन्यलक्षणैर्महाव्रतैः 'परिगतैः' आश्रितैः । पुनः किम्भूताम् ? स्याद्वादेन—यथास्थानं द्रव्यार्थिकपर्यायार्थिकनयार्पणोपनीतसप्तभङ्गात्मकवाक्येन मुद्रिताः—प्रतिहतोत्थानाः कुतीर्थानां—बौद्धादीनां नयानाम्—ऋजुसूत्रादीनाम् अवतारः—उपन्यासविशेषाः यया सा तथा ताम् । पुनः कीदृशीम् ? चतुराणां—सुपरिज्ञातहेयोपादेयानाम् उचितः—योग्यः अर्थः—पुमर्थो यस्यां सा तथा * ताम् * ॥ ३ ॥

साहाय्यमत्र कुरुषे शिवसाधने या-
ऽपाता मुदा रसमयस्य निरन्तराये !।
गान्धारि ! वज्रमुशले जगतीं तवाऽस्याः,
पातामुदारसमयस्य निरन्तराये ! ॥ ४ ॥

इति श्रीपद्मप्रभस्तुतिः ॥ ६ ॥

साहाय्यमत्रेति ॥ हे 'निरन्तराये !' निर्गता अन्तरायाः—प्रत्यूहा यस्याः तस्या आमन्त्रणम्, पुनः हे 'निरन्तराये !' निरन्तरः—अप्रतिविच्छेद आयः—लाभो यस्याः तस्या आमन्त्रणम्, हे गान्धारि !

अस्यास्तव चरणमुशले 'जगतीं' पृथिवीं 'पातां' रक्षताम् । असाः कस्याः ? या त्वम् 'अत्र' जगति 'रसमयस्य' प्रकृष्टशान्तरसस्य 'उदारसमयस्य' स्फारसिद्धान्तस्य 'शिवसाधने' मोक्षसम्पादने निरुपद्रवोपाये वा 'मुदा' हर्षेण 'साहाय्यम्' एककार्यनिर्वर्त्तनप्रवणतां 'कुरुषे' तनुषे । त्वं कीदृशी ? 'अपाता' पातरहिता ॥ ४ ॥

॥ इति श्रीपद्मप्रभस्तुतिविवरणम् ॥ ६ ॥

यदिह जिन ! सुपार्श्व ! त्वं निरस्ताकृतक्ष्मा-
वनमद ! सुरबाधा हृद्यशोभाऽवतारम् ।
तत उदितमजस्रं कैर्बुधैर्गीयते ना-
ऽवनमदसुर ! बाधाहृद् ! यशो भावतारम् ॥ १ ॥

यदिहेति ॥ हे 'निरस्ताकृतक्ष्मावनमद !' क्ष्मायाः—पृथिव्याः अवनं—रक्षणं क्ष्मावनम्, अकृतम्—अविहितं क्ष्मावनं येन तादृशो यो मदः—"अहमुत्तमजातिमान्" इत्याद्यवलेपः सोऽकृतक्ष्मावनमदः, निरस्तोऽकृतक्ष्मावनमदो येन तत्सम्बुद्धौ; हे 'सुरव !' सुष्ठु-शोभनः संस्कारवत्त्वादिगुणोपेतत्वाद् रवः—ध्वनिर्यस्य तत्सम्बुद्धौ, हे 'अवनमदसुर !' अवनमन्तः—प्रणमन्तोऽसुराः—दनुजा यस्य तत्सम्बुद्धौ, हे 'बाधाहृत् !' बाधां—शारीरमानसाद्यनेकभेदभिन्नं दुःखं हरतीति बाधाहृत् तत्सम्बुद्धौ, हे 'हृद्यशोभ !' मनोहरश्रीक !, हे सुपार्श्व जिन ! त्वं 'इह' जगति यदिति वाक्यार्थकर्मे 'अवतारं' जन्म 'अधाः' धृतवान् 'ततः' तस्मात् 'उदितम्' उत्पन्नं यशः

'कैर्बुधैः' कैः पण्डितैः 'अजस्रं' निरन्तरं भावेन—श्रद्धया तारम्—उच्चैर्यथा स्यात् तथा न गीयते [१] *अपि तु* सर्वैरपि परोपकारसारत्वदवतारजनितं यशो विचित्रचरित्रप्रबन्धेन गीयत इति भावः ॥ १ ॥

जगति शिवसुखं ये कान्तिभिर्भासयन्तो-
ऽदुरितमदरतापध्यानकान्ताः सदाऽऽशाः ।
जिनवरवृषभास्ते नाशयन्तु प्रवृद्धं,
दुरितमऽदरतापध्यानकान्ताः सदाशाः ॥ २ ॥

जगतीति ॥ ते जिनवरवृषभाः 'प्रवृद्धं' बहुभवोपचितं 'दुरितं' ज्ञानावरणीयादिदुष्टविपाकं कर्म 'नाशयन्तु' क्षपयन्तु । किम्भूताः ? न स्तो दरतापौ—भयोपतापौ यस्मिन्नेतादृशं यद् ध्यानं—शुक्लाख्यं तेन कान्ताः—मनोज्ञाः । पुनः किं० ? सती—शोभनाऽऽशा येषां, सताम्—उत्तमानां आशा वा येषु ते, सर्वस्यैवोत्तमकार्यस्य परमार्थतस्तीर्थङ्करोद्देश्यकत्वादिति भावः । ते के ? ये 'जगति' विश्वे 'शिवसुखं' निर्वाणशर्म 'अदुः' दत्तवन्तः, किं कुर्वन्तः ? 'कान्तिभिः' किरणैः 'सदा' निरन्तरम् 'आशाः' दिशः 'भासयन्तः' शोभयन्तः । पुनः किं० ? इताः—गताः मदः—जात्यादिस्मयो रतं—निधुवनम् अपध्यानं च—आर्तरौद्रद्वन्द्वं कान्ता—वामाक्षी च येभ्यस्ते तथा ॥ २ ॥

मुनितिरपठद् यं वर्जयन्ती हतोद्य-
त्तमसमऽहितदाऽत्रासाऽऽधिमाऽऽनन्दिताऽरम् ।
समयमिह भजाऽऽप्तेनोक्तमुच्चैर्दधानं
तमऽसम ! हितदात्रा साधिमानं दितारम् ॥ ३ ॥

---

१ "भावेन तारम्—उच्चैरम्" इति यशो-विशेषणताऽप्यत्रोपयुक्तप्रायम् ॥

मुनिततिरिति ॥ हे 'असम !' निरुपमपुरुष ! त्वम् 'इह' जगति तं 'समयं' सिद्धान्तं 'भज' अङ्गीकुरु । किं कुर्वन्तम् ? उच्चैः 'साधिमानं' चारुभावं 'दधानं' बिभ्रत्, किम्भूतम् ? 'आप्तेन' भगवता 'उक्तं' भाषितम्, कीदृशेनाऽऽप्तेन ? 'हितदात्रा' पथ्यप्रदायिना । पुनः किम्भूतम् ? *दितं-* खण्डितम् आरम्-अरिसमूहो येन * तम् । * तं कम् ? यं 'मुनिततिः' यतिश्रेणिः 'अपठत्' अभाणीत्, किं कुर्वती ? 'आधिं' मानसीं व्यथां 'वर्जयन्ती' त्यजन्ती, नहि सकृति आधिलेशेऽपि श्रुतपाठो प्रभवति कार्याय इत्येवमुक्तम् । यं किम्भूतम् ? हतं-क्षपितम् उद्यद्-उत्पद्यत् तमः-पापं येन तम् । मुनिततिः किम्भूता ? अहितम्-अपथ्यं भावारिं वा यति-खण्डयति या सा । पुनः किम्भूता ? 'अत्रासा' नास्ति त्रासो यस्याः सा । पुनः किं० ? 'अरम्' अत्यर्थम् 'आनन्दिता' संतुष्टा ॥ ३ ॥

अवतु करिणि याता साऽर्हतां प्रौढभक्त्या,
मुदितमकलितापाया महामानसी माम् ।
वहति युधि निहत्याऽनीकचक्रं रिपूणा-
मुदितमकलितापा या महामानसीमाम् ॥ ४ ॥

इति श्रीसुपार्श्वजिनस्तुतिः ॥ ७ ॥

अवत्विति ॥ सा महामानसी माम् 'अवतु' रक्षतु । किम्भूता ? 'करिणि' हस्तिनि 'याता' प्राप्ता । पुनः किम्भूता ? अकलितः-अप्राप्तः अपायः-विघ्नमपत्तष्टलाभो (?) वा यया सा । मां किम्भूतम् ? 'अर्हतां' तीर्थकृतां 'प्रौढभक्त्या' तीव्रभावनया 'मुदितं' प्राप्तहर्षम् । सा का ? * या * 'युधि' संग्रामे 'उदितम्' उच्छिन्नं (उत्थितं) 'रिपूणां' शत्रू-

णाम् 'अनीकचक्रं' सेनासमूहं 'निहत्य' हत्वा.....दीनत्वात् 'महामानसीमाम्' अवलेपनपराकाष्टां 'वहति' बिभर्त्ति, सीमाशब्द आकारान्तोऽप्यस्ति । 'निहत्य' इत्यनेन फलोक्तिः, फलप्राप्तिपूर्वंनाहं .....वैफल्यं निरस्तम् । या किम्भूता ? 'अकलितापा' रणानुशयरहितत्वात् *संग्रामोपतापरहिता* कलियुगकृतापरहिता वा ॥

॥ इति श्रीसुपार्श्वजिनस्तुतिविवरणम् ॥ ७ ॥

तुभ्यं चन्द्रप्रभ ! भवभयाद् रक्षते लेखलेखा-
नन्तव्याऽपापमदमहते ! सन् ! नमोऽहासमाय ! ।
श्रेयःश्रेणीं भृशमऽसुमतां तन्वते ध्वस्तकामा-
नन्तव्यापाऽपमद ! महते सन्नमोहाऽसमाय ॥ १ ॥

तुभ्यमिति ॥ हे 'सन्!' उत्तम !, हे 'लेखलेखानन्तव्य !' देवश्रेणीप्रणमनीय !, हे 'अदमहते !' दमस्य-इन्द्रियजयस्य हतिः-अपकर्षो दमहतिः, नास्ति सा यस्य तस्याऽऽमन्त्रणम्, हे 'अहासमाय !' हासः-हास्यमोहजनित उत्फुल्लगण्डादिविकारव्यञ्जकः परिणामो माया च-वञ्चना हासमाये न स्तः यस्य तस्याऽऽमन्त्रणम्, हे 'ध्वस्तकामानन्तव्याप !' ध्वस्तः-निरस्तः कामस्य-कन्दर्पस्य अनन्तः-अपर्यवसितो व्यापः-व्यासक्तता येन तस्यामन्त्रणम्, हे 'अपमद !' अपगतो मदः-जात्याद्यवलेपो यस्मात् तस्यामन्त्रणम्, हे 'सन्नमोह !' सन्नः-निलीनो मोदः-गोयलीवर्दन्यायात् हास्यादिभिन्नमोहनीयप्रकृतिजनितपरिणामसमूहो अज्ञानं वा यस्य तस्यामन्त्रणम्, हे चन्द्रप्रभ ! तुभ्यं नमः, 'अस्तु' इति शेषः । तुभ्यं किं कुर्वते ? 'भवभयात्' संसारसाध्वसाद् 'अपापं' पापरहितं पुरुषं रक्षते,

न च 'तस्य किं रक्षणे पौरुषम् ? स्वत एव तेन संसारत्यागात्' इति शङ्कनीयम्, त्यक्तसंसाराणामपि परिणामानपकर्षस्य हृदयस्थितभगवन्माहात्म्याधीनत्वाद् इत्थमेवास्य क्षेमकारित्वं युक्तमित्यवसेयम् । पुनः किं० ? 'भृशम्' अत्यर्थम् 'असुमतां' प्राणिनां 'श्रेयःश्रेणीं' कल्याणमालां 'तन्वते' कुर्वते । पुनः किंभूताय ? 'महते' अनुपकृतोपकारित्वेनोत्तमपुरुषप्रकृतिशालिने, एवं च सहजदानप्रियत्वादिगुणशालित्वरूपसत्त्वात् महत्त्वं भिन्नमिति पौनरुक्त्यं परिहृतं द्रष्टव्यम् । पुनः किम्भूताय ? 'असमाय' निरुपमाय ॥ १ ॥

श्रेयो दत्तां चरणविलुठन्नम्रभूपालभूयो-
मुक्तामालाऽसमदमहिता बोधिदानाऽमऽहीना ।
मोहापोहादुदितपरमज्योतिषां कृत्स्नदोषै-
र्मुक्तामालाऽसमदमहिता बोऽधिदानाऽऽमहीना॥२॥

श्रेय इति ॥ 'बोधिदानां' तीर्थकृतां 'माला' श्रेणिः 'वः' युष्माकं 'श्रेयः' कल्याणं दत्ताम् । किम्भूता ? चरणयोः—पादयोः विलुठन्ती नम्रभूपालानां—नमनशीलनृपतीनां भूयसी—बह्वी मुक्तामाला—मुक्ताफलश्रेणिर्यस्याः सा । पुनः किं० ? असमदमानां—निरुपमेन्द्रियजयानां पुंसां हिता—हितकारिणी, * अकाराम्रेडयात् * समे—सकले असमे—अपरिच्छेदे (?) वा दमहिते यस्याः सा । पुनः किं ? अहीना नास्ति हीनं—न्यूनं यस्याः सा, क्षीणलाभान्तरायत्वेन कृतकृत्यत्वात् । पुनः किं० ? कृत्स्नदोषैः—घातिकर्मजनितैरन्त * रङ्ग * रागादिभिः सकलैर्जीवगुणप्रतिपन्थिपरिणामैः मुक्ता ।

पुनः किं० ? असमदैः-असाहङ्कारैः महिता-पूजिता अराहृदा (?) मदराहित्यविधुरा महिता-उत्सविता यस्याः । सति वा भगवतः पूजासत्कारप्राचुर्योऽपि तं उपबृंहणेऽमनेन (?) मदलेशस्याप्यभावात्, तथाऽऽचारे—णो पूजासत्कारे उववूहित्ता भवइ" इति । पुनः किं० ? अधि-अधिकं सकलभुवनवर्त्तिदानशोभातिशायि दानं-सांवत्सरिकादि अभयादि वा यस्याः सा । पुनः किं०? 'आमहीना' रोगरहिता । बोधिदानां किम्भूतानाम् ? 'मोहापोहात्' मोहनीयकर्मक्षयात् उदितं-उत्पन्नं परमं-प्रकृष्टं ज्योतिः-ज्ञानं केवलाख्यं येषां तेषाम् ॥ २ ॥

रङ्गद्भङ्गः स्फुटनयमयस्तीर्थनाथेन चूला-
मालापीनः शमदमवताऽसङ्गतोपायहृद्यः ।
सिद्धान्तोऽयं भवतु गदितः श्रेयसे भक्तिभाजा-
माऽऽलापी नः शमदमवता सङ्गतोऽपायहृद्यः ॥३॥

रङ्गद्भङ्ग इति ॥ 'तीर्थनाथेन' अर्हता 'गदितः' उक्तः 'अयं' सिद्धान्तः 'भक्तिभाजां' सेवापराणां 'नः' अस्माकं 'श्रेयसे' कल्याणाय भवतु । किम्भूतः ? रङ्गन्तः-परस्परानुप्रवेशेन उल्लसन्तो भङ्गाः-वचनविकल्पा यत्र सः । पुनः किं० ? स्फुटाः-प्रकटा ये नयाः-नैगमादयः तन्मयः-प्रचुरतद्वान् । पुनः किं० ? चूलामालया-चूलिकाश्रेण्या पीनः-पुष्टः । पुनः किं० ? असङ्गतायाः-निःसङ्गतायाः य उपायः-रत्नत्रयसाम्राज्यं तेन हृद्यः-मनोहरः । पुनः किं० ? 'आलापी' आलापकवान्, "भक्तिभाजाम्" इति सानुस्वारपाठे वा मां-लक्ष्मीं लापयति-आकारयतीत्येवंशील इति व्याख्यं-

यम् । पुनः किं० ? 'सङ्गतः' प्रसङ्गादिसङ्गतिमान् । अयं कः ? यः 'अपायहृत्' विघ्नहर्त्ता, अस्तीति शेषः । वीर्यनाथेन किम्भूतेन ? शमः—क्षान्तिः दमश्च—पञ्चेन्द्रियजयः तौ विद्येते यस्याऽसौ तद्वान् तेन । किं कुर्वता ? 'अवता' रक्षता, कम् ? 'शमदं' क्षान्तिदायिनं पुमांसम् ॥ ३ ॥

सा त्वं वज्राङ्कुशि ! जय मुनौ भूरिभक्तिः सुसिद्ध-
प्राणायामेऽशुचि मतिमऽतापाऽऽपदन्ताऽबलानाम् ।
दत्से वज्राङ्कुशभृदऽनिशं दर्पहन्त्री मदत्त-
प्राणा या मे शुचिमतिमता पापदन्तावलानाम् ॥ ४ ॥

इति श्रीचन्द्रप्रभजिनस्तुतिः ॥ ८ ॥

सा त्वमिति ॥ हे वज्राङ्कुशि ! सा त्वं जय । किम्भूता त्वम् ? 'भूरिभक्तिः' विपुलभक्तिमती । क ? 'मुनौ' साधौ, कीदृशे ? सुष्ठु—अतिशयेन सिद्धः—जातपरिकर्मा प्राणायामः—विधिवच्छ्वासप्रश्वासरोधव्यापारो यस्य तस्मिन्, पुनः किं० ? 'अशुचि' नास्ति शुक्र-शोको यस्य तस्मिन् । सा का ? या त्वं 'मे' मम (मह्यं) 'मतिं' बुद्धिं दत्से । त्वं कि० ? 'अतापा' तापरहिता । पुनः किम्भूता ? 'आ*पदन्ता' आपदाम् अन्तः—नाशो यस्याः सकाशात् । * पुनः किं० ? 'प्रदत्तप्राणा' प्रदत्तबला, केषाम् ? 'अबलानां' बलरहितानां पुंसाम् । पुनः किं० ? 'अनिशं—निरन्तरं 'वज्राङ्कुशभृत्' कुलिशाङ्कुशधारिणी । पुनः किं० ? 'दर्पहन्त्री' गर्वनाशिनी, केषाम् ? पापा एव ये दन्तावलाः—हस्तिनस्तेषाम्, अत एव "वज्राङ्कुशभृत्"

इति सहेतुकं विशेषणम् । पुनः किं० ? शुचिमतीनां-निर्मलबुद्धीनां मता-आराध्यत्वेन अभीष्टा ॥ ४ ॥

॥ इति श्रीचन्द्रप्रभस्तुतिविवरणम् ॥ ८ ॥

यस्याऽतनोद् देवततिर्महं सु-
प्रभाऽवतारे शुचिमन्दरागे ।
इहाऽस्तु भक्तिः सुविधौ दृढा मे,
प्रभावतारेऽशुचि मन्दरागे ॥ १ ॥

यस्याऽतनोदिति ॥ 'इह' अस्मिन् 'सुविधौ' सुविधिनाथे 'मे' मम 'दृढा' निबिडा भक्तिरस्तु । किम्भूते ? प्रभावेन-अनुभावेन तारे, प्रभावस्य भावः प्रभावता तां रातीति प्रभावतारः चित्ताध्यवसायो येषा ते, प्रभावात् तारयति-संसारसागरपार प्रापयति यः तस्मिन्निति वा । पुनः कि० ? 'अशुचि' शोकरहिते । पुनः किं० ? 'मन्दरागे'.....स्वभाव यत् एव दुरुदर्कविषयानुबन्धः संदन्धः विधुरे (?) । इह क ? यस्य 'अवतारे' प्रयति (प्रभवति) 'देवततिः' सुरश्रेणिः शुचिः-निर्मलो यो मन्दरः-मेरुः स एव अगः-पर्वतः तत्र 'मह' उत्सवम् 'अतनोत्' अकरोत् । किम्भूता देवततिः ? सु-शोभना प्रभा-कान्तिर्यस्याः सा ॥ १ ॥

अभूत् प्रकृष्टोपदामेषु येषु,
न मोहसेना जनितापदेभ्यः ।
युष्मभ्यमाऽऽप्ताः ! प्रवितोदयेभ्यो,
नमोऽहसेनाः ! जनितापदेभ्यः ॥ २ ॥

अभूदिति ॥ भोः 'अहसेनाः !' नास्ति हसः-हास्यमेषामिति अहसाः-केवलिनः, उक्तं च—"केवली णं भंते ! हसेज्ज वा उस्सु-आएज्ज वा ? गो० ! णो इणट्ठे समट्ठे" इति, तेषामिनाः-स्वामिनः, कृतकृत्यानामपि तेषां व्यवहारानुरोधेन प्रणमनीयत्वात्, तेषामामन्त्रणम् । भोः 'आप्ताः !' तीर्थकृतः ! एभ्यो युष्मभ्यं नमः, 'अस्तु' इति शेषः । युष्मभ्यं किम्भूतेभ्यः ? प्रथितः-प्रसिद्धः उदयः-अतिशयो ज्ञानं वा येषां तेभ्यः । पुनः किं० ? जनिता-पम्-आध्यात्मिकादिभेदभिन्नं संसारतापं घ्नन्ति-खण्डयन्ति तेभ्यः । एभ्यः केभ्यः ? येषु 'मोहसेना'.....क्रमहामोहराजचमूः 'जनितापत्' कृतविपद् नाऽभूत् । किम्भूतेषु येषु ? प्रकृष्टः-अति-शयित उपशमः-तितिक्षापयति (?) [येषु तेषु] ॥ २ ॥

वाणी रहस्यं दधती प्रदत्त-
महोदयाऽवद्धिरनीतिहारि ।
जीयाज्जिनेन्द्रैर्गदिता त्रिलोकी-
महो ! दयावद्धिरनीति हारि ॥ ३ ॥

वाणीति ॥ 'जिनेन्द्रैः' तीर्थकरैः 'गदिता' उक्ता 'वाणी' प्रवच-नात्मिका भाषाद्रव्यसंहतिर्जीयात् । जिनेन्द्रैः किं कुर्वद्भिः ? 'अहो' इत्याश्चर्ये 'त्रिलोकीं' त्रिजगतीम् 'अवद्भिः' रक्षद्भिः । पुनः किं० 'दयावद्भिः' करुणाशालिभिः । वाणी किं धुर्वती ? 'रहस्यं' सकल-शास्त्रोपनिषद्भूतमर्थं 'दधती' भूयो भूयः कर्तव्यत्वप्रतिपादनेन पुष्णती । रहस्यं किम्भूतम् ? अनीतिम्—अन्यायं हरतीत्येवंशीलम् ।

पुनः किं० ? 'अनीति' नास्ति इतिर्यस्मात् तत् । पुनः किं० ? 'हारि' मनोहारि । वाणी किंभू० ? प्रदत्तो महोदयः-मोक्षो यया सा ॥ ३ ॥

जगद्गतिर्विद्रुमकान्तकान्तिः,
करोऽतुलाभं शमऽदम्भवत्याः ।
ददन्नतानां ज्वलनायुधे ! नः,
करोतु लाभं शमदं भवत्याः ॥ ४ ॥
॥ इति श्रीसुविधिजिनस्तुतिः ॥ ९ ॥

जगद्गतिरिति ॥ हे ज्वलनायुधे ! 'भवत्याः' तव 'करः' हस्तः 'नः' अस्माकं 'लाभं कल्याणप्राप्तिं करोतु । लाभं किम्भूतम् ? अतुला-निरुपमा आभा-शोभा यस्मात् तम् । करः किम्भूतः ? जगतां गतिः-आधारः । पुनः किं० ? विद्रुमवत्-प्रवालवत् पाटलत्वेन कान्त्या-मनोज्ञा कान्तिर्यस्य सः । किं कुर्वन् ? 'नतानां' कृतनतीनां पुरुषाणां 'शं' सुखं ददत्, किं० शम् ? 'शमदम्' उपशमप्रदम्, एतेन कृपालानुबन्धित्वमावेदितम् । [भवत्याः] कथम्भूतायाः ? 'अदम्भवत्याः' अकपटवत्याः ॥ ४ ॥

॥ इति श्रीसुविधिजिनस्तुतिविवरणम् ॥ ९ ॥

जयति शीतलतीर्थपतिर्जने,
वसु मती तरणाय महोदधौ ।

१-२ यद्यप्यत्र मूल-टीका-अवचूरिपुस्तकेषु—"ज्वालेम्बलो विद्रुम०" इत्येव पाठ उपलभ्यते तथाप्यत्रास्माभिष्टीकानुसारेणेमे यत्नेऽपि "जगद्गतिर्विद्रुम०" इति पाठ आदृतः ॥

ददति यत्र भवे चरणग्रहे,
वसुमतीतरणाय महो दधौ ॥ १ ॥

जयतीति ॥ स इत्यस्य गम्यमानत्वात् सः 'शीतलतीर्थपतिः' शीतलनामा भगवान् 'जयति' सर्वोपद्रवनिवर्त्तते (सर्वोत्कर्षेण वर्त्तते,) परञ्च सर्वेन च (?) नमस्कारताऽऽक्षिप्यते । किम्भूतः ? 'मती' मतम्—इष्टं कृतकृत्यत्वादस्यास्तीति मती । स कः ? 'यत्र' यस्मिन् भवे महोदधौ इति अस्तसप्तपष्ठीयम् (?) तस्यो.....
.....दाद्यमहोदधेरित्यर्थः, 'तरणाय' पारगमनाय तदर्थमिति
.....चरणग्रहे.....'महः' तेजो
दधौ, भवति हि भगवति हि.....
ललितशोकैलोंकैः दीप्तः क्रमदाऽनन्तरमभिहततमिस्रप्रसरवन्नित्या-
लोक एव भूलोक इति ति किम् ?.....वस्य,
किम्भूताय ? 'इतरणाय' गतसङ्ग्रामाय ॥ १ ॥

अवचूरिः—'वसुमति' धनवति, ददति इति अविवक्षितकर्म, 'मती' मतवान्, 'वसु' धनम्, तरणाय, 'इतरणाय' गतसङ्ग्रामाय, भवे महो दधौ इति व्यस्तरूपकम् ॥ १ ॥

वितर शासनभक्तिमतां जिना-
वलि ! तमोहरणे ! सुरसम्पदम् ।
अधरयच्छिवनाम महात्मनां,
वलितमोहरणे ! सुरसं पदम् ॥ २ ॥

वितरेति ॥ हे 'जिनावलि !' जिनश्रेणि ! हे 'तमोहरणे !' पापहारिणि ! हे 'वलितमोहरणे !' वलितौ—उद्धान्तौ मोहरणौ—

अज्ञानसङ्गामौ यया तस्या आमन्त्रणम्, त्वं 'शासनभक्तिमता' जिनप्रवचनरसिकहृदयानां महात्मनां 'शिवनाम' मोक्षाह्वयं पदं 'वितर' प्रयच्छ। पदं किं० ?'सुरसं' सु-शोभनो रसः-शान्ताख्यो यत्र तत्, यद्यपि विभाव्यादेभिव्यङ्ग्यचिद्विवर्त्तरूपो रसो मोक्षेऽनुपपन्नः तथापि वास्तवानन्दरूपस्य तस्य तत्र नानुपपत्तिरिति ध्येयम्। किं कुर्वत्? 'सुरसम्पदं' देवविभूतिम् 'अधरयत्' तिरस्कुर्वत्, मोक्षसुखस्य त्रैकालिकसकलसांसारिकसुखेभ्योऽप्यनन्तगुणत्वात् सुखमिश्रितत्वेन प्रतिबन्धिसम्बन्धविधुरत्वात् औत्सुक्यविनिवृत्त्या स्वभावापरावृत्तेश्चेति विभावनीयम् ॥ २ ॥

भगवतोऽभ्युदितं विनमाऽऽगमं,
जन ! यतः परमापदमाऽऽदरात् ।
इह निहत्य शिवं जगदुन्नतिं,
जनयतः परमाऽऽप दमादरात् ॥ ३ ॥

भगवत इति ॥ हे जन ! त्वं वच्छब्दाध्याहारात् ततः 'भगवतः' तीर्थङ्करात् 'अभ्युदितं' साक्षादर्थतया परम्परया सूत्रतया भावात् स्वभावं * 'आगमं' * सिद्धान्तं 'विनम' विशेषेण नमस्कुरु । [कथम् ? 'आ] दरात्' श्रद्धापूर्वकमियोगात्। ततः कुतः ? 'यतः' यस्मात् 'जगत्' "तात्स्थ्याच्चद्व्यपदेशः" इति न्यायात् जगद्वर्त्ती लोकः *'इह' अत्रैव लोके *'परमापदं' कर्मादियजनितामुत्कृष्टां बाधां निहत्य 'परम्' उत्कृष्टं 'शिवं' 'आप' प्राप, परमा आपद् यस्मात्

* "यद्यपि मोक्षमभिव्यञ्ज-" इति पाठः स्यात् ॥

तादृशं परं-कामादिभावशत्रुं निहत्येति वा व्याख्येयम्, परा-प्रकृष्टा वा मा-लक्ष्मीः तस्याः पद[मिति वा व्याख्येयम् । 'दमा]दरात्' दमेन-इन्द्रियजयेन अदरः-निर्भयोऽतिशब्दरसः (?) तस्मात् । किं कुर्वतः ? 'उन्नतिं' तीर्थप्रभावनां 'जनयतः' विदधतः ॥ ३ ॥

स्तवरवैरिदशैस्तव सन्ततं,
न परमऽच्छविमानविलासिता ।
न घनशस्त्रकलाऽप्यरिदारिणी,
न परमच्छवि ! मानवि ! लासिता ॥ ४ ॥

॥ इति श्रीशीतलजिनस्तुतिः ॥ १० ॥

स्तवरवैरिति ॥ हे 'परमच्छवि !' परमा-उत्कृष्टा छविः-कान्तिः यस्याः तस्या आमन्त्रणम्, हे मानवि ! 'सन्ततं' निरन्तरं 'त्रिदशैः' देवैः *तव* 'स्तवरवैः' स्तोत्रध्वनिभिः कृत्वा 'अच्छविमानविलासिता' निर्मलविमानविलासशालिता न 'परं' केवलं 'न लासिता' न स्फार्तिं प्रापितां किन्तु 'घनशस्त्रकलाऽपि' निबिडशस्त्राभ्यासनिपुणताऽपि न न लासिता, द्वयोर्नञोः प्रकृतार्थगमकत्वात् लासितैवेत्यर्थः । किम्भूता ? 'अरिदारिणी' शत्रुविदारणनिबन्धनम्, एवं चोक्तगुणद्वयेनाऽऽराध्यत्वं व्यज्यते ॥ ४ ॥

॥ इति श्रीशीतलजिनस्तुतिविवरणम् ॥ १० ॥

जिनवर ! भजन् श्रेयांस ! स्यां अताम्बुहृतोदय-
ऋवदव ! नतोऽहं तापातङ्कमुक्त ! महागम ! ।
गतभवनभ्रान्तिश्रान्तिः फलेग्रहिरुल्लस-
ऋवदवनतो हन्ताऽपातं कमुक्तमहागम ! ॥ १ ॥

जिनवरेति ॥ हे 'व्रताम्बुहृतोदयद्भवदव !' व्रतमेव-अहिंसादि अम्बु-जल तेन हृतः-विध्यापित उदयन्-प्रवर्द्धमानो भवदवः-संसारवह्नियेन तस्यामन्त्रणम्, हे 'तापातङ्कमुक्त !' तापः-अनुशय आतङ्कश्च-भयं ताभ्यां मुक्तः-रक्तो यस्तस्यामन्त्रणम्, हे 'महागम !' महानाम्-उत्सवानाम् आगमः-पुण्यप्राग्भाराकृष्टतया स्वत उपनमना यस्य तस्यामन्त्रणम्, हे 'उक्तमहागम !' उक्तः-प्रतिपादितो महान्-सकलतत्त्वातिशायी आगमः-सिद्धान्तो येन तस्यामन्त्रणम्, हे 'जिनवर !' केवलिश्रेष्ठ ! हे श्रेयास ! अहम् 'उल्लसद्भवदवनतः' करुणातिशयभ्राजमानत्वज्ञाणतः गता भवनभ्रान्तिश्रान्तिः-संसारकान्तारभ्रमणश्रमो यस्यैतादृशः सन् 'अपातम्' अप्रतिपाति 'कं' सुखं 'भजन्' आश्रयन् 'हन्त' इति कोमलामन्त्रणे 'फलेग्रहिः' फलवान् स्याम् । किम्भूतोऽहम् ? 'नतः' कृतप्रणामः ॥१॥

जिनसमुदयं विश्वाधारं हरन्तमिहाङ्गिनां,
भवमऽदरदं रुच्या कान्तं महामितमोहरम् ।
विनयमधिकं कारं कारं कुलादिविशिष्टता-
भवमदरदं रुच्याऽकान्तं महामि तमोहरम् ॥२॥

जिनसमुदयमिति ॥ अहम् 'अधिकम्' अतिशयितम् अधिकं कं-सुखं यस्मादिति वा 'विनयं' कायेन मनसा चायनविलक्षणं 'कारं कार' कृत्वा कृत्वा 'जिनसमुदयं' तीर्थकरसमूहं 'रुच्या' अद्धया 'महामि' भावस्तवेन पूजयामि । किम्भूतम् ? विश्वस्य-जगत आधार-दुर्गतिपतनप्रतिपन्थिमार्गोपदेशकत्वात् प्राणभूतम् । किं पुर्वनम् ? 'इह' जगति 'अङ्गिना' प्राणिनां 'भवं' संसारं 'दरन्तम्'

अपनयन्तम् । पुनः किं० ? 'अदरदम्' अभयदम्, पुनः किं० ? 'कान्तं' मनोहरम्, कया ? 'रुच्या' कान्त्या । भवं किम्भूतम् ? महैः—पाणिप्रहायुत्सवैः अमितः—अपरिमितो यो मोहः—मोहनीयं कर्म संसारभ्रमणहेतुभूतमज्ञानं वा तं राति—ददाति यस्तम्, महैः—उत्सवैः अमिता—अपरिमिता मा—लक्ष्मीर्येभ्यस्तादृशा ये ऊहाः—वितर्काः तान् ददातीति जिनसमुदयस्यैव वा विशेषणं व्याख्येयमेतत् । पुनः किं० ? कुलस्य आदी कुलादौ—जातिलाभे, कुलम् आदि येषां तानि त[द्गुणसं]विज्ञानबहुव्रीहिणा कुलैश्वर्यबलरूपतपःश्रुतानि, ततः कुलादौ च कुलादीनि चेत्येकशेषात् कुलादीनां—जात्यादीनां या विशिष्टता—उत्कर्षः तद्भवः—तदुत्पन्नो यो मदः—अहङ्कारस्तं रुदति—अपनयति यस्तम् । पुनः किं० ? अकस्य—दुःखस्य अन्तो यस्मात् तम्, पुनः किं० ? 'तमोहरं पापापनयनकरम् ॥ २ ॥

शुचिगमपदो भङ्गैः पूर्णो हरन् कुमतापहो-
ऽनवरतमलोभावस्थामाऽऽश्रयन्नऽयशोऽभितः ।
जन ! तव मनो यायाच्छायामयः समयो गल-
ज्जवरतमलो भावस्थामाश्रयं नयशोभितः ॥ ३ ॥

शुचीति ॥ हे 'आश्रयन्' भजन्', काम्? 'अलोभावस्थां' सन्तोषदशाम्, एतेनाधिकारित्वं सूचितम्, अधृतिमतोऽनधिकारित्वात्; हे जन ! 'समयः' सिद्धान्तः तव मनोऽनवरतं 'यायात्' गच्छतु । मनः किम्भूतम् ? 'भावस्थामाश्रयं' श्रद्धाबलमन्दिरम् । समयः किम्भूतः ? शुचीनि—पवित्राणि गमपदानि—सदृशपाठपदानि यत्र सः । पुनः किं० ? 'भङ्गैः' विकल्पविशेषैः 'पूर्णः' भृतः ।

*पुनः*किं कुर्वन्? 'अभितः' समन्ताद् 'अयशः' अकीर्तिं 'हरन्' अपनयन्। पुनः किं०? कुमतमेव*बौद्धादिदर्शनम् अपहन्तीति कुमतापहः। पुनः किं०? 'छायामयः'.....। पुनः किं०? गलन्-शिथिलीभवन् नवरतस्य-अभिनवनिघुवनस्य मलः-मलमिव*भावमालिन्यहेतुत्वान्मलो यस्मात् सः, अस्ति हि समया-भ्यासस्य पुंवेदोदयनिरोधहेतुत्वेन तथात्वम्। पुनः किं०? नयैः-नैगमादिभिः 'शोभितः' भ्राजितः ॥ ३ ॥

सुकृतपटुतां विघ्नोच्छित्त्या तवारिहतिक्षमा-
ऽपविफलकरा द्युत्याऽगेहाऽऽघनाघनराजिता।
वितरतु महाकाली घण्टाक्षसन्ततिविस्फुर-
त्पविफलकरा द्युत्यागेहा घनाघनराजिता ॥ ४ ॥

॥ इति श्रीश्रेयांसजिनस्तुतिः ॥ ११ ॥

सुकृतेति ॥ हे 'अगेह!' गेहरहित! महाकाली 'विघ्नोच्छित्त्या' पापापनयनेन तव 'सुकृतपटुतां' पुण्यप्रभुत्वं 'वितरतु' ददातु। किम्भूता? अरीणां-वैरिणां हतिः-नाशः तत्र क्षमा-समर्था, एतेन परार्थसम्पत्तिवाहिका स्वार्थसम्पदुक्ता। पुनः किं०? अप-गतं विफलं-मोघं कर्म यस्याः सा ईदृशी सती कं-सुखं यतीति अपविफलकरा, अप-गतो विफलः-मोघः करः-दण्डो यस्याः सेति वा। पुनः किं०? 'द्युत्या' कान्त्या*आ-समन्तात् *'घना-घनराजिता' मेघवत् शोभिता। पुनः किं०? घण्टा च अक्ष-न्तविश्च विस्फुरती-शोभमाने पविफले च घण्टाक्षसन्ततिविस्फु-रत्पविफलानि, तानि करे-हस्ते यस्याः सा। *पुनः किं०? वि-

वि–खलेकि त्यागेच्छा–दानेच्छा यस्याः सा, नृभवस्पृहयालुतया द्योः त्यागेच्छा वा यस्याः सा* । पुनः किं० ? घनाघा–निबिडपापा ये नराः–मनुजास्तैरजिता तेषामप्रत्यक्षेति ॥ ४ ॥

॥ इति श्रीश्रेयांसजिनस्तुतिविवरणम् ॥ ११ ॥

